# Shri Sharada Devi Ashtakam

# શ્રીશારદાદેવ્યષ્ટકમ્

## Document Information

Text title : Shri Sharada Devi Ashtakam

File name : shAradAdevyaShTakam4.itx

Category : deities_misc, gurudev, rAmakRiShNa, aShTaka

Location : doc_deities_misc

Author : Dinanathatripathi

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# શ્રીશારદાદેવ્યષ્ટકમ્

ન યાચે સમૃદ્ધિં ન ચાનિત્યમાયુ-
ર્ન રૂપં ન ધર્મં યશો વા સમિત્રમ્ ।
અધર્મં ન કાર્યં ન દૈન્યં દિવં વા
મતિર્મે તુ ભૂયાત્ પદે શારદાયાઃ ॥ ૧॥

સ્વદેશે વિદેશે ભવ ત્વં દયાર્દ્રા-
ત્વનીચે સુનીચે સમાના વિધાત્રી ।
જલે વા ભુવિ ત્વં પ્રજાનાં શરણ્યા
નમસ્તે નમસ્તે પદે શારદાયાઃ ॥ ૨॥

અજસ્રં યથા તે ભજામ્યઙ્ઘ્રિ યુગ્મં
યથા નામ તેઽહં જપામિ સચિન્ત્યઃ ।
અપૂર્વાન્ ગુણાંસ્તે સ્મરામિ પ્રહૃષ્ટ-
સ્તથા શારદા ત્વં વિધેહિ પ્રસન્ના ॥ ૩॥

વૃથૈવ પ્રયાતિ ક્ષણં મે વરેણ્યે !
ત્વિદાનીં પ્રબોધો ન જાતસ્ત્રિનેત્રે ! ।
યદા શારદા ત્વં મમાસિ પ્રપદ્યા
ભયં કિં યમાત્ સ્યાન્નમઃ શારદાયૈ ॥ ૪॥

અહો કઃ શુભોઽયં પ્રવૃત્તોઽસ્તિ કાલો
યતઃ શારદામ્બાગતાઽસ્યાં ધરિત્ર્યામ્ ।
વિચિન્ત્ય નરાસ્તાં લીલાં પવિત્રા
મમર્ત્યા ભવન્ત્વપ્રમત્તા ભવન્તઃ ॥ ૫॥

યથા જાનકી સા સરામા સમર્ચ્યા
હ્યસૌ રાધિકા વા સકૃષ્ણા નમસ્યા ।
સતી સા સશમ્ભુર્યથારાધનીયા
તથા શારદા મે સરામાસકૃષ્ણા ॥ ૬॥

રવિસ્ત્વં શશી ત્વં ત્વમિન્દ્રો યમસ્ત્વં
    પ્રચેતાસ્ત્વમગ્નિર્વિરાઝત્મનાસ્યાઃ ।
ભયાનાં ભયં ત્વં કરાલાપિ કાલી
    ધુનીતે મનો મે કથં ત્વાઽભિવન્દે ॥ ૭॥

ન કોઽપ્યસ્તિ સત્યં મદીયો બિના ત્વાં
    વિષાક્તે દ્વિતીયે ગતિર્યો ભવાબ્ધૌ ।
અસઙ્ખ્યાનિ જન્માનિ સન્ત્વમ્બિકે મે
    સદા ચેત્ સ્મરામિ ત્વદીયે પદાબ્જે ॥ ૮॥

વૃથા શબ્દં પરિત્યજ્ય વદ જિહ્વે નિરન્તરમ્ ।
શારદે શારદે માતઃ જયાનન્દમયીતિ ચ ॥

ઇતિ પં. શ્રીદીનાનાથત્રિપાઠી કાવ્ય-વ્યાકરણ-ન્યાય-તર્ક-સાઙ્ખ્ય-
    વેદાન્તતીર્થ-વિરચિતં “શ્રીશ્રીશારદાદેવ્યષ્ટકમ્” સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

*Shri Sharada Devi Ashtakam*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*